# सुन्दरकाण्ड एकोनपञ्चाशः सर्गः (४९) – रावण प्रभाव दर्शनम्

ततः स कर्मणा तस्य विस्मितो भीम विक्रमः ।
हनुमान् रोष ताम्राक्षो रक्षोऽधिप मवैक्षत ॥ १ ॥

भ्राजमानं महार्हेण काञ्चनेन विराजता ।
मुक्ताजाला वृतेनाथ मुकुटेन महाद्युतिम् ॥ २ ॥

वज्र सम्योग सम्युक्तैर् महार्ह मणिविग्रहैः ।
हैमै राभरणैश् चित्रैर् मनसेव प्रकल्पितैः ॥ ३ ॥

महार्हक्षौम संवीतं रक्त चन्दन रूषितम् ।
स्वनुलिप्तं विचित्राभिर् विविधाभिश्च भक्तिभिः ॥ ४ ॥

विवृतैर् दर्शनीयैश्च रक्ताक्षैर् भिम दर्शनैः ।
दीप्त तीक्ष्ण महादंष्ट्रैः प्रलम्ब दशनच्छदैः ॥ ५ ॥

शिरोभिर् दशभिर् वीरं भ्राजमानं महौजसम् ।
नानाव्याल समाकीर्णैः शिखरैरिव मन्दरम् ॥ ६ ॥

नीलाञ्जन चय प्रख्यं हारेणोरसि राजता ।
पूर्ण चन्द्राभ वक्त्रेण सबलाक मिवाम्बुदम् ॥ ७ ॥

बाहुभिर् बद्ध केयूरैश् चन्दनोत्तम रूषितैः ।
भ्राजमानाङ्गदैः पीनैः पञ्चशीर्षै रिवोरगैः ॥ ८ ॥

महति स्फाटिके चित्रे रत्न सम्योग संस्कृते ।
उत्तमास् तरणास्तीर्णे सूपविष्टं वरासने ॥ ९ ॥

अलङ्कृताभि रत्यर्थं प्रमदाभिः समन्ततः ।
वाल व्यजन हस्ताभि रारात् समुप सेवितम् ॥ १० ॥

दुर्धरेण प्रहस्तेन महा पार्श्वेन रक्षसा ।
मन्त्रिभिर् मन्त्र तत्त्वज्ञैर् निकुम्भेन च मन्त्रिणा ॥ ११ ॥

उपोपविष्टं रक्षोभिश् चतुर्भिर् बलदर्पितैः ।
कृत्स्नं परिवृतं लोकं चतुर्भिरिव सागरैः ॥ १२ ॥

मन्त्रिभिर् मन्त्र तत्त्वज्ञै रन्यैश्च शुभ बुद्धिभिः ।
अन्वास्यमानं सचिवैः सुरैरिव सुरेश्वरम् ॥ १३ ॥

अपश्यद् राक्षस पतिं हनुमा नतितेजसम् ।
विष्ठितं मेरु शिखरे सतोयमिव तोयदम् ॥ १४ ॥

स तैः सम्पीड्यमानोऽपि रक्षोभिर् भीम विक्रमैः ।
विस्मयं परमं गत्वा रक्षोऽधिप मवैक्षत ॥ १५ ॥

भ्राजमानं ततो दृष्ट्वा हनुमान् राक्षसेश्वरम् ।
मनसा चिन्तयामास तेजसा तस्य मोहितः ॥ १६ ॥

अहो रूपमहो धैर्य महो सत्त्वमहो द्युतिः ।
अहो राक्षस राजस्य सर्व लक्षण युक्तता ॥ १७ ॥

यद्यधर्मो न बलवान् स्यादयं राक्षसेश्वरः ।
स्यादयं सुरलोकस्य सशक्रस्यापि रक्षिता ॥ १८ ॥

अस्य क्रूरैर् नृशंसैश्च कर्मभिर् लोक कुत्सितैः ।
तेन बिभ्यति खल्वस्माल् लोकाः सामर दानवाः ॥ १९ ॥

अयं ह्युत्सहते क्रुद्धः कर्तु मेकार्णवं जगत् ।
इति चिन्तां बहुविधा मकरोन् मतिमान् हरिः ।
दृष्ट्वा राक्षस राजस्य प्रभाव ममितौजसः ॥ २० ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥